# Brahmana Kritam Krishnanarayama Stotram

# ब्रह्मणा कृतं कृष्णनारायणस्तोत्रम्

## Document Information

Text title : Brahmana Kritam Krishnanarayama Stotram

File name : brahmaNAkRRitaMkRRiShNanArAyaNastotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 581/10-20||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# ब्रह्मणा कृतं कृष्णनारायणस्तोत्रम्

नीलाचलेन महता पर्वतेन विराजितम् ।
सृष्ट्वा चराचरं ब्रह्मा चिन्तयामास वै पुरा ॥ १०॥

देहिनां मोक्षणार्थं वै विष्णुं स्तोष्ये परेश्वरम् ।
अहं तु मम मोक्षार्थं भजिष्ये पुरुषोत्तमम् ॥ ११॥

विचार्येत्थं प्रतुष्टावाऽनादिश्रीकृष्णमच्युतम् ।
ॐ नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥ १२॥

अक्षरेशाय मुक्तानामधिपाय नमो नमः ।
राधालक्ष्मीप्रभाहंसामाणिकीशाय ते नमः ॥ १३॥

पार्वतीशाय सगुणामञ्जुलेशाय ते नमः ।
श्रीकृष्णस्त्वं परब्रह्म नारायणस्त्वमेव च ॥ १४॥

भूमा विष्णुर्महाविष्णुर्वैराजस्त्वं प्रवर्तसे ।
अन्तर्यामी प्रकाशश्च गोचरोऽगोचरस्तथा ॥ १५॥

तत्त्वात्मकश्च प्रकृतिविकृतिज्ञस्त्वमेव च ।
कोशसंस्थश्चाणुसूक्ष्मो महीयान्महतां भवान् ॥ १६॥

द्रव्यं गुणश्च कर्म त्वं भावोऽभावस्त्वमेव च ।
माया च कारणं कार्यं त्वमेवाऽसि नमोऽस्तु ते ॥ १७॥

संसारे त्वात्मलुब्धानां सारमात्मा त्वमेव च ।
असारश्चापि ते दृष्ट्या साररूपः प्रजायते ॥ १८॥

सोऽहं रागं परित्यज्य भविष्ये त्वां परेश्वरम् ।
किमसारस्वरूपाणां तुषाणामयघातनात् ॥ १९॥

यत्र चान्ते भवेच्छून्यं तन्नारभेत बुद्धिमान् ।
मया सृष्टिः शून्यकान्ता कर्तव्या नैव केशव ॥ २०॥

प्रसीदाऽद्य प्रमोक्षं च प्रदेहि मम चेच्छतः ।

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ५८१-अध्यायान्तर्गतं ब्रह्मणा कृतं कृष्णनारायमस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय ५८१/१०-२०॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 581/10-20..

Proofread by PSA Easwaran

*Brahmana Kritam Krishnanarayama Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*